Vorwort.

Die Herausgabe eines der jetzt so schwer zugänglichen Bhāsa-Texte und zumal des für die Geschichte des Dramas und des Krishnaismus so wichtigen Bāla-carita bedarf keiner weiteren Rechtfertigung. Von meinem ursprünglichen Plan, im wesentlichen den in der Trivandrum Sanskrit Series 1912 von T. Gaṇapati Śāstrī herausgegebenen Text abzudrucken, mit Anmerkungen zu versehen und statt der Chāyā ein alphabetisches Verzeichnis der Prakritwörter mit deutscher Übersetzung beizufügen, bin ich bald wieder abgekommen, weil ein solches Verfahren den praktischen Bedürfnissen wenig entspricht, und weil

Vorwort.

Die Herausgabe eines der jetzt so schwer zugänglichen Bhāsa-Texte und zumal des für die Geschichte des Dramas und des Krishnaismus so wichtigen Bālacarita bedarf keiner weiteren Rechtfertigung. Von meinem ursprünglichen Plan, im wesentlichen den in der Trivandrum Sanskrit Series 1912 von T. Gaṇapati Śāstrī herausgegebenen Text abzudrucken, mit Anmerkungen zu versehen und statt der Chāyā ein alphabetisches Verzeichnis der Prakritwörter mit deutscher Übersetzung beizufügen, bin ich bald wieder abgekommen, weil ein solches Verfahren den praktischen Bedürfnissen wenig entspricht, und weil

Vorwort.

Die Herausgabe eines der jetzt so schwer zugänglichen Bhāsa-Texte und zumal des für die Geschichte des Dramas und des Krishnaismus so wichtigen Bāla-carita bedarf keiner weiteren Rechtfertigung. Von meinem ursprünglichen Plan, im wesentlichen den in der Trivaṇdrum Sanskrit Series 1912 von T. Gaṇapati Śāstrī herausgegebenen Text abzudrucken, mit Anmerkungen zu versehen und statt der Chāyā ein alphabetisches Verzeichnis der Prakritwörter mit deutscher Übersetzung beizufügen, bin ich bald wieder abgekommen, weil ein solches Verfahren den praktischen Bedürfnissen wenig entspricht, und weil

die Resultate der Textprüfung, die meiner Übersetzung des Bālacarita vorausging, eine selbständige Ausgabe ermöglichten. Wenn ich mich bemüht habe, bei der Feststellung des Textes möglichst konservativ vorzugehen, so geschah dies nicht nur im Hinblick auf den Mangel an handschriftlichem Material, sondern auch auf die verhältnismäßig gute Überlieferung dieser Dramen, die durch die zahlreichen in ihnen vorkommenden Archaismen bestätigt wird. Freilich wird man insbesondere von dem Bālacarita sagen können, daß manche szenischen Bemerkungen, ja manche, wenn auch nicht wesentliche Teile des Dialoges verloren gegangen sind. Vielleicht wird die Entdeckung neuer Handschriften hier Klarheit schaffen. Vorläufig sind wir in erster Linie auf Gaṇapatis Handschriftenabdruck angewiesen.

Eine besondere Schwierigkeit bot die Feststellung des Textes der Prakritstellen. Das Bālacarita nimmt mit dem Pañcarātra eine Sonderstellung ein, insofern in diesen beiden Stücken ein von W. Printz, Bhāsa's Prākrit, Seite 6 als Māgadhī bezeichneter Dialekt auftritt, der den Zischlaut ṣ und Nomin. Sg. -o aufweist, während die Māgadhī sonst durch ś und Nomin. Sg. -e gekennzeichnet ist. Hier liegt aber wohl nicht Māgadhī, sondern ein mit der Saurasenī verwandter, besonderer Hirtendialekt vor. Nun sind zwar die Hauptkennzeichen dieses Dialekts, ṣ statt s und ś, sowie ḷ statt r, nicht konsequent durchgeführt; da aber der Rückfall in s und r an manchen Stellen gehäuft auftritt und sich oft in besonders geläufigen Wörtern findet, so haben wir in diesen Abweichungen

IV von der Regel Fehler der Handschrift zu erblicken, die verbessert werden müssen.

Ein Vergleich der im Bālacarita vorkommenden Prakritstellen ergab mir, daß wir hier drei Dialekte zu unterscheiden haben, oder vielmehr drei Arten eines und desselben Dialekts:

1. Śaurasenī, von allen Frauen, außer den Hirtenmädchen, gesprochen.

2. Eine Abart der Śaurasenī, die durch s und ḷ gekennzeichnet ist und von den Hirtenmädchen, Wächtern und Ringern gesprochen wird.

3. Eine Abart der Śaurasenī, die ṣ und ḷ aufweist und von den Hirten gesprochen wird.

Einige Stellen könnten zu der Annahme veranlassen, daß die Hirtenmädchen ebenso, wie die anderen Frauen, Śaurasenī sprechen. Aber nur s ist regelmäßig, während

statt r ebenso oft l erscheint, der Dialekt der Hirtenmädchen kann aber doch wohl nicht so sehr von dem der Hirten abweichen, wie dies der Fall wäre, wenn sie r, statt das in ihrer männlichen Umgebung üblichen l, sprächen. Dagegen stimmt die Aussprache des Zischlautes als s sehr gut zu dem weiblichen Charakter ihrer Rede gegenüber der rauhern Sprachart der Hirten.

Nach diesen Prinzipien habe ich meine Verbesserungen in den Prakritstellen angebracht. Wenn ich Seite 13 „parijanam" in der Antwort des Hirten Nanda unverändert stehen ließ, so geschah dies, weil die Wiederholung dieses Wortes gleichsam das Echo der Frage Vasudevas darstellt. In manchen Partizipien und öfters bei der 3. Pers. Sing. Praes. ist das d ausgefallen, z. B. vaḍḍhaï, udia;

dies habe ich in Versen gelten lassen, in Prosa nicht, außer in einem geläufigen Ausdruck wie kā gaū. Ursprünglich wollte ich auch Besonderheiten wie taha, ahava und ähnliches der Śaurasenī angleichen, doch scheinen hier echte Bildungen vorzuliegen, da th auch sonst fast regelmäßig zu h wird.

Da ich es aus verschiedenen Gründen vorzog, Text, Chāyā, Personennamen und Bühnenbemerkungen in derselben Schriftgröße wiederzugeben, so habe ich die Zwischenbemerkungen zwischen Doppelstriche gestellt und die Chāyā von dem Text durch einen Strich getrennt. Die Personennamen stehen immer an derselben Stelle und sind durch eine Interpunktion von dem Dialog abgegrenzt. Das Personenverzeichnis habe ich weggelassen, um für Wichtigeres

Raum zu bekommen. Daß ich den Halbstrich verwendet habe, bitte ich, nicht ungünstig aufzunehmen. Wenn ich ihn bei einigen Vokativen gegen meinen sonstigen Gebrauch nicht gesetzt habe, so geschah dies aus Rücksicht auf den Zusammenhang.

Die Anmerkungen enthalten alle von meinem Text abweichenden Lesarten. Sonst habe ich die Anmerkungen, um Raum zu sparen, möglichst eingeschränkt und mich auch nicht mehr auf die Begründung meiner Textänderungen eingelassen; ich hoffe, daß die meisten von selbst einleuchten. Da es mir darum zu tun war, ein möglichst genaues Bild von Gaṇapati's Ausgabe zu vermitteln, durften seine Anmerkungen nicht unberücksichtigt bleiben. Sollte da oder dort ein Fehler stehen geblieben sein, so bitte

ich um Nachsicht und gütige Mitteilung.

Herrn Geheimrat H. Jacobi, den Herren Professoren R. v. Garbe und J. Hertel, die mich bei meinen Arbeiten mit Rat und Tat unterstützt haben, spreche ich meinen aufrichtigsten Dank aus, ebenso dem Verlag H. Haessel, der die Herausgabe dieses Textes und der Übersetzung unter den derzeitigen schwierigen Verhältnissen in dankenswerter Weise übernommen hat.

Dr. H. Weller

Inhalt

बालचरितम् ।

॥ नान्द्यन्ते ततः प्रविशति सूत्रधारः ॥

सूत्रधारः ।

शङ्खक्षीरवपुः पुरा कृतयुगे नाम्ना तु नारायण-
स्त्रेतायां त्रिपदार्पितत्रिभुवनो विष्णुः सुवर्णप्र-
भः ।
दूर्वाश्यामनिभः स रावणवधे रामो युगे द्वापरे
नित्यं यो ऽञ्जनसन्निभः कलियुगे वः पातु
दामोदरः ॥ १ ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग पश्यामि ।

॥ नेपथ्ये ॥

अहं गगनसञ्चारी ।

सूत्रधारः । भवतु विज्ञातम् ।

पतत्यसौ पुष्पमयी च वृष्टि-
र्नदन्ति तूर्याणि च देवतानाम् ।

दृष्टुं हरिं वृष्णिकुले प्रसूत-
मभ्यागतो नारद एष तूर्णम् ॥२॥

॥ निष्क्रान्तः ॥

॥ स्थापना ॥

॥ ततः प्रविशति नारदः ॥

नारदः।

अहं गगनसञ्चारी त्रिषु लोकेषु विश्रुतः।
ब्रह्मलोकादिह प्राप्तो नारदः कलहप्रियः ॥३॥

भोः!

क्षीणेषु देवासुरविग्रहेषु
नित्यप्रशान्ते न रमे ऽन्तरिक्षे।
अहं हि वेदाध्ययनान्तरेषु
तन्त्रीश्च वैराणि च घट्टयामि ॥४॥

अपि च।

भक्तिः परा मम पितामहभाषितेषु
सर्वाणि मे बहुमतानि तपोवनानि।
सत्यं ब्रवीमि करजाग्रहता च वीणा
वैराणि भीमकठिनाः कलहाः प्रिया मे ॥५॥

तद् भगवन्तं लोकादिमनिधनमव्ययं लोक-
हितार्थे कंसवधार्थं वृष्णिकुले प्रसूतं नारा-
यणं द्रष्टुमिहागतो ऽस्मि। अये इयमत्रभव-
ती देवकी। मायया शिशुत्वमुपागतं त्रि-

लोकेश्वरं प्रगृह्य वसुदेवेन सह शनैः स्वगृ-
हान्निष्क्रामति। यैषा ।

लोकानामभयकरं गुरुं सुराणां
दैत्यानां निधनकरं रथाङ्गपाणिम्।
शोकार्ता शशिवदना निशि प्रसूता २
बाहुभ्यां गिरिमिव मन्दरं वहन्ती ॥६॥

एष एष भगवान् नारायणः ।

अनन्तवीर्यः कमलायताक्षः
सुरेन्द्रनाथो ऽसुरवीर्यहन्ता।
त्रिलोककेतुर्जगतश्च कर्ता
भर्ता जनाना पुरुषः पुराणः ॥७॥

हन्तैतदुत्पन्नं कलहस्य मूलम्। यावदहम-
पि भगवन्तं नारायणं प्रदक्षिणीकृत्य ब्र-
ह्मलोकमेव यास्यामि। नमो भगवते त्रै-
लोक्यकारणाय।

नारायणाय नरलोकपरायणाय
लोकानुनाय कमलामललोचनाय।
रामाय रावणविरोचनपातनाय
वीराय वीर्यनिलयाय नमो वराय ॥८॥

॥ निष्क्रान्तः ॥

॥ ततः प्रविशति बालहस्ता देवकी ॥

देवकी। (a) हद्धि ' पुत्तअस्स ' मे महाणुभावत्तणं सूअइस्सन्दाणि जम्मसमअसमुब्भूदाणि महाणिमित्ताणि पच्चक्खीकरअन्ती अवि कंसहदअंणिसंसत्तणं चिन्तअन्ती सुट्ठु ण पच्चआमि मन्दभाइणी। कहिं णु गदो अय्यउत्तो। ॥ परिक्रम्य ' अग्रतो विलोक्य॥ अम्मो एसो अय्यउत्तो हरिसविम्हअफुल्लणअणो इदो एव्व आअच्छदि।

॥ ततः प्रविशति वसुदेवः॥

वसुदेवः। ॥ सविमर्शम्॥ भोः ' किन्नु खल्विदम्।

भ्रमति नभसि नियुच्चण्डवातानुविद्धैर्नवजलदनिनादैर्मेदिनी सप्रकम्पा।
इह तु [3] रहसि नूनं रक्षणार्थं प्रजानामसुरसमितिहन्ता विष्णुरद्यानतीर्णः ॥ १॥

(a) हा धिक् ' पुत्रकस्य मे महानुभावत्वं सूचयिष्यन्ति जन्मसमयसमुद्भूतानि महानिमित्तानि प्रत्यक्षीकुर्वत्यपि कंसहतकनृशंसत्वं चिन्तयन्ती सुष्ठु न प्रत्येमि मन्दभागिनी। क्व नु गत आर्यपुत्रः।— अम्मो एष'

॥ विलोक्य ॥ एषा देवकी ।

अगणितपरिखेदा याति यत्नं सुताना-
मपचयगमनार्थं सप्तमं रचमाणा ।
बहुगुणकृतलोभा जन्मकाले निमित्तैः
सुत इति कृतसंज्ञं कंसमृत्युं वहन्ती ॥ १०॥

देवकी । ॥ उपसृत्य ॥ (a) जेदु अय्यउत्तो ।

वसुदेवः । देवकि । अर्धरात्रं खलु वर्तते । प्रसुप्तो मथुरायां सर्वो जनः । तस्माद् यावन्न कश्चित् पश्यति तावद् बालं गृहीत्वापक्रामामि ।

देवकी । (b) कहिं अय्यउत्तो इमं णइस्सदि ।

वसुदेवः । देवकि । सत्यं ब्रवीषि । अहमपि न जाने । किन्तु एकच्छत्रच्छायां पृथिवीं समाज्ञापयति दुरात्मा कंसः । तत् क्व नु खल्वयमायुष्मान् नेतव्यो भविष्यति । अथवा यत्र दैवं विधास्यति तत्र बालं गृहीत्वापक्रामामि ।

देवकी । (c) अय्यउत्त इच्छामि दाव णं सुदिट्ठं कत्तुं ।

(a) जयत्वार्यपुत्रः । (b) क्वार्यपुत्र इमं नेष्यति ।
(c) आर्यपुत्र इच्छामि तावदेनं सुदृष्टं कर्तुम् ।

वसुदेवः। अयि आतिपुत्र वत्सले।[1]
किं द्रष्टव्यः शशाङ्को ऽयं राहोर्वदनमण्डले।
त्वयाप्यस्य सुदृष्टस्य कंसो मृत्युर्भविष्यति ॥११॥

देवकी। (a) सव्वहा ण भविस्सदि।

वसुदेवः। यद् भवत्याभिहितं तत् सर्वदैवतैरभिहितं भवतु। आनय।

देवकी। (b) गण्हदु अय्यउत्तो।

वसुदेवः। ॥ गृहीत्वा ॥ अहो गुरुत्वं बालस्य। साधु।[6]

विन्ध्यमन्दरसारो ऽयं बालः पद्मदलेक्षणः।
गर्भे त्वया[3] धृतः श्रीमानहो धैर्यं हि योषितः॥ १२॥

देवकि। प्रविश त्वमभ्यन्तरम्।

देवकी। (c) एसा गच्छामि मन्दभाआ।
॥ निष्क्रान्ता ॥

वसुदेवः। एषा देवकी
हृदयेनेह तत्राङ्गैर्द्विधाभूतेव गच्छति।
यथा नभसि तोये च चन्द्रलेखा द्विधाकृता॥ १३॥

हन्त प्रविष्टा देवकी। यावदहमपि नगरद्वारं संश्रयामि।[7] एष भोः[8]

(a) सर्वथा न भविष्यति। (b) गृह्णात्वार्यपुत्रः।
(c) एषा गच्छामि मन्दभागा।

प्रथमसुतविनाशजातमन्यु-
नृपतिभयाकुलितः प्रगृह्य बालम्।
त्वरिततरमिह प्रयामि मार्गे
गिरिमिव मन्दरमुद्वहन् भुजाभ्याम् ॥१४॥

॥ परिक्रम्य ॥ इदं नगरद्वारम्। यावत् प्रविशामि। ॥ प्रविश्य॥ अये प्रसुप्तो मधुरायां सर्वो जनः। यावदपक्रामामि। ॥ परिक्रम्य॥ निष्क्रान्तो ऽस्मि मधुरायाः। अहो बलवांश्चायमन्धकारः। सम्प्रति हि

लिम्पतीव तमो ऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥१५॥

अहो तमसः प्रभुत्वम्।

अप्रकाशा इव दिशो घनीभूता इव द्रुमाः।
सुनिविष्टस्य लोकस्य कृतो रूपविपर्ययः ॥१६॥

नाहं गन्तुं समर्थः। अये दीपिकालोकः। किन्नु खलु दुरात्मा कंसो ममापक्रमणं ज्ञात्वा दीपिकाभिः परिवृतो मां ग्रहीतुमागतो भवेत्। भवतु अहमस्य दर्पप्रशमनं करोमि।

॥ खड्गमुत्कोशयति ॥ ॥ निवृत्यावलोक्य ॥
अये न कश्चिद् दृश्यते। आ

तमसा संवृते लोके मम मार्गमपश्यतः।
अपक्रमणहेतोस्तु कुमारेण प्रभा कृता ॥१७॥

एष मार्गः ॥ यावदपक्रामामि। अये इयं भगवती यमुना कालवर्षसम्पूर्णा सन्निहिता। अहो व्यर्थो मे परिश्रमः। किमिदानीं करिष्ये। भवतु। दृष्टम्।

इमां नदीं ग्राहभुजङ्गसङ्कुलां
महोर्मिमालां मनसापि दुस्तराम्।
प्लवे भुजेनाशु[2] गतार्थविक्लवो[3] •
वहामि सिद्धिं यदि दैवतं स्थितम् ॥१८॥

॥ तथा कृत्वा सविस्मयम् ॥ हन्त द्विधा छिन्नं जलम्। इतः स्थितम्। इतः प्रधावति। दत्तो मे भगवत्या मार्गः। यावदपक्रामामि। ॥ अवतीर्य ॥ निष्क्रान्तोऽस्मि यमुनायाः। अये हुङ्कारशब्द इव श्रूयते। व्यक्तं घोषसमीपे[4] वर्ते मन्दभाग्यः। आ। अत्र च समीपघोषे मम वयस्यो नन्दगोपः प्रतिवसति। स खलु मया कंसाज्ञया निगलितः कश्चाभिहृतश्च। यावत् प्रविशामि। अथवा रात्रौ वसुदेवः प्रविष्ट इति शङ्किता गोपालका भविष्यन्ति। तस्मादिह न्यग्रोधपादपस्याधस्तात् प्रभातवेलां रजन्याः प्रतिपालयामि। भो भो न्यग्रोधदेवताः। अयमयं बालो लोकहितार्थं कंसवधार्थं वृष्णिकुले

प्रसूतश्चेद्[1] घोषात् कश्चिदिहागच्छतु।
न[2] न। मम वयस्यो नन्दगोप एवागच्छतु।

॥ततः प्रविशति दारिकां गृहीत्वा नन्दगोपः॥

नन्दगोपः। ॥सशोकम्॥ (a) दालिए दालिए। किं दाणि णो गेहकण्णिं ण[3] ल्लमिअ तदो नो उज्झिअ णं गच्छसि। सम्पदि हि महिषपदसम्पादसदिसं[4] अहो बलिअं अन्धआरं।

दुद्दिणविणट्ठजोण्हा रत्ती वट्टइ णिमीलिआआला।
सम्पाउदप्पसुत्ता णीलणिवसणा जहा गोवी ॥१२॥

अज्ज हि अड्ढरत्ते अम्हाणं कुडुम्बिणीए जसोदाए पसूदा इअं[5] दालई तवस्सिणी

(a) दारिके दारिके। किमिदानीं नो गृहे[6] न रत्वा[7] ततो न उज्झित्वा नूनं[8] गच्छसि।[9] सम्प्रति हि महिषपतसम्पातसदृशमहो[10] बलवदन्धकारम्।

दुर्दिनविनष्टज्योत्स्ना रात्रिर्वर्तते निमीलिताकारा[11]।
सम्प्रावृतप्रसुप्ता नीलनिवसना यथा गोपी ॥१२॥

अद्य ह्यर्धरात्रेऽस्माकं कुटुम्बिन्या यशोदया प्रसूतेयं[12] दारका तपस्विनी जा-

जादमत्ता। एव्व ओगदप्पाणा संवुत्ता। धुवे अम्हाणं घोषस्स उइदो इन्दयञ्ञो णाम उ-च्छवो भविस्सदि। ता मा खु एदं दुक्खं गो-वजणेहि अणुहूअमाणं त्ति मए एक्काइणा णिगळगुरुचळणेण इमं दारिअं गहिदूअ णिग्गदो[1] म्हि। जसोदा वि तवस्सिणी णेव[2] जाणादि दारओ वा दारिआ वा पसूद[3] त्ति मोहं गदा। दारिए दारिए।

वसुदेवः। को नु खल्वयं रात्रौ परि-देवयति। अस्मत्सब्रह्मचारी खल्वयं तपस्वी।

नन्दगोपः। (a) किं दाणिं णो गेहे[4] कस्सि णं कमिअ तदो णो उज्झिअ णं

घोषस्योचित इन्द्रयज्ञो नामोत्सवो भविष्य-ति। तद् मा खल्वेतद्दुःखं गोपजनैरनुभूयमा-नमिति मयैकाकिना निगर्डगुरुचरणेनेमां[6] दारिकां गृहीत्वा[2] निर्गतो ऽस्मि। यशोदा-पि तपस्विनी नैव जानाति दारको वा दारिका वा प्रसूत इति मोहं गता। दारिके दारिके।

(a) किमिदानी नो गृहे[5] न रत्वा[5] ततो न उज्झित्वा नन्नं[4] गच्छसि।

गच्छ षि।

वसुदेवः। स्वरेण प्रत्यभिजानामि। मम वयस्येन नन्दगोपेन भवितव्यम्। यावच्छ-ब्दापयामि। वयस्य नन्दगोप। इतस्तावत्।

नन्दगोपः। ॥ सभयम्॥ (a) अविहा को दाणिं मं पुदपुक्वेण विअ पळयोगेण णन्द-गोव• णन्दगोव त्ति मं षद्दावेदि। किंसु ळक्स-षो वा आदु पिषाओ वा। ईदिषीए पदि-भअळअणीए मदळिआ दाळिआ मम हत्ते। किंसु हु कळिण्णं।

वसुदेवः। वयस्य नन्दगोप। अलम-न्यशङ्कया। इतस्तावत्।

नन्दगोपः ॥ कर्णं दत्त्वा। सावधानम्॥ (b) अम्मो षळयोगेण भट्टा वषुदेवो त्ति जा-णामि। जाव उवषप्पिष्ष। अहव तहिं मम

(a) अविहा क इदानीं मां श्रुतपूर्वेणेव स्वर-योगेन नन्दगोप नन्दगोप इति मां शब्दापयति। किन्नु राक्षसो वा। उत पिशाचो वा। ईदृ-श्यां प्रतिभयरजन्यां मृता दारिका मम हस्ते। किन्नु खलु करिष्यामि। (b) अम्मो स्वरयोगेन भर्ता वसुदेव इति जानामि। यावदुपसर्प्यामि।

किं कय्यं।. एदिणा कंसस्स रञ्ञो वअणं सुणिअ अवरुद्धो कसाहि ताडिअ णिअडेहि बद्धो म्हि। ता ण गमिस्सं। अहव धिक्[1] खु मे णिसंसभावं। मम गुणसहस्सं किदं। दुक्खे दुक्खाअदि। सुहे सुहिणो होदि। तह वि सुमरामि राअसासणेण किदं एक्कबन्धणं। जाव उवसप्पिस्सं। इअं दाऊई[3]। किं करिस्सं। [4]भोदु। एवं दाव करिस्सं। ॥ उपसृत्यावलोक्य च। सविस्मयम्॥ पभादा रअणी। एसो भट्टा वसुदेवो दाअअं गहिअ [5]णिद्दो। ॥ उपसृत्य॥ जेदु भट्टा जेदु।

अथवा तत्र मम किं कार्यम्। एतेन कंसस्य राज्ञो वचनं श्रुत्वापराद्धः कशाभिस्ताडयित्वा निगडै[6]र्बद्धो ऽस्मि। तन्न गमिष्यामि। अथवा धिक् खलु मे नृशंसभावम्। मम गुणसहस्रं कृतम्। दुःखे दुःखीयति। सुखे सुखी भवति। तथापि स्मरामि राजशासनेन कृतमेकबन्धनम्। यावदुपसर्प्स्यामि। इयं दार[8]की। किं करिष्यामि। भवतु। एवं तावत् करिष्यामि। — प्रभाता रजनी। एष भर्ता वसुदेवो दारकं गृहीत्वा

वसुदेवः। वयस्य नन्दगोप। अपि भगवतीभ्यो गोभ्यः कुशलम्।

नन्दगोपः। (a) आम भट्टा कुषळं।

वसुदेवः। अथ भवतः परिजनस्य कुशलम्।

नन्दगोपः। (b) परिजणमिति। आम भट्टा कुषळं।

वसुदेवः। वयस्य। किमिदानीं प्रच्छाद्यते।

नन्दगोपः। (c) भट्टा। णत्थि किंचि।

वसुदेवः। मम खलु प्राणैः शापितः स्याद्[1] यदि सत्यं न ब्रूयात्।

नन्दगोपः। (d) का गई। षुणादु भट्टा।[3] अज्ज अड्ढरत्ते अम्हाणं कुडुम्बिणीए। णहि णहि। तुम्हाणं दाषीए जषोदाए पषूदा इअं[2] दाळई तवष्षिणी जादमत्ता

स्थितः।— जयतु भर्ता जयतु।
a) आम भर्तः कुशलम्। (b) परिजनमिति। आम भर्तः कुशलम्। (c) भर्तः। नास्ति किंचित्। (d) का गतिः। शृणोतु भर्ता। अद्यार्धरात्रे ऽस्माकं कुटुम्बिन्या। नहि नहि। युष्माकं दास्या यशोदया प्रसूतेयं

एव्व ओगदप्पाणा संवुत्ता। षुवे अम्हाणं घोषष्प उइदो इन्दयञ्ञो णाम उष्षुवो[1] पविष्पदि। ता मा खु एदं दुक्खं गोव-जणेहि अणुहूअमाणं त्ति मए एक्काइणा णिगळगुळुचळणेण इमं दाळिअं गण्हिअ णिग्गदो म्हि। जषोदा वि तवष्षिणी णेव[2] जाणादि दाळओ दाळिआ वा पपूद त्ति मोहं गदा।

वसुदेवः। हन्त भोः! न शक्यं लोकस्याधिष्ठानभूतं कृतान्तं वञ्चयितुम्। वयस्य! काष्ठभूतं कलेवरं[3] त्यज्यताम्।

नन्दगोपः। (a) ण षक्कुणोमि भट्टा! ण षक्कुणोमि।

4
दारकी तपस्विनी जातमात्रैवापगतप्राणा संवृत्ता। श्वो ऽस्माकं घोषस्योचित इन्द्रयज्ञो नामोत्सवो भविष्यति। तद् मा खल्वेतद् दुःखं गोपजनैरनुभूयमानमिति मयैकाकिना निगर्डगुरुंचरणेनेमां दारिकां गृहीत्वा निर्गतो ऽस्मि। यशोदापि तपस्विनी नैव जानाति दारको दारिका वा प्रसूत इति मोहं गता।

(a) न शक्नोमि भर्तः! न शक्नोमि।

वसुदेवः। ईदृशो लोकधर्मः। त्यज्यताम्।

नन्दगोपः। (a) जं भट्टा आणवेदि। दाकिए दाकिए। ॥ इति रोदिति ॥

वसुदेवः। वयस्य! अलमलं रुदितेन। उत्तिष्ठोत्तिष्ठ।

नन्दगोपः। ॥ तथा कृत्वोपगम्य ॥ (b) जेदु भट्टा। इमिणा दासजणेण किं कत्तव्वं।

वसुदेवः। वयस्य! ननु त्वमपि जानासि दुरात्मना कंसेन मम षट् पुत्रा निधनमुपानीता इति।

नन्दगोपः। (c) जाणामि भट्टा! जाणामि।

वसुदेवः। तत् सप्तमो ऽयं दीर्घायुः। नास्ति मम पुत्रेषु भाग्यम्। तव भाग्याज्जीवितुं गृह्यताम्।

नन्दगोपः। (d) भाआमि भट्टा! भाआमि। जदि कंसो लाआ सुणादि[1] वसुदेवस्स दारुओ णन्दगोवस्स हत्थे णासो णिक्खित्तो त्ति! किं

(a) यद् भर्ताज्ञापयति। दारिके दारिके। (b) जयतु भर्ता। अनेन दासजनेन किं कर्तव्यम्। (c) जानामि भर्तः! जानामि। (d) बिभेमि भर्तः! बिभेमि। यदि कंसो राजा शृणोति[1] वसुदेवस्य दारको नन्दगोपस्य

बहुणा। गदं एव्व मे सीसं।

वसुदेवः। ॥ आत्मगतम् ॥ स्नेहत विपन्नं का-
र्यम्। उर्जिताः खलु नृशंसाः। तदेवं कथया-
मि। ॥ प्रकाशम् ॥ वयस्य नन्दगोप।
यद्यत्र भवतः किञ्चिन्मया पूर्वकृतं भवेत्।
तस्य प्रत्युपकारस्य कालस्ते समुपागतः ॥२०॥

नन्दगोपः। (५) किं किं पच्चुवकाळं ति।
जदि कंसो वा होदु' कंसस्य पिदा उग्गसेणो
वा होदु। आणेदु भट्टा दारअं।

वसुदेवः। वयस्य' गृह्यताम्।

नन्दगोपः।(६) भट्टा' अचोक्खिदो म्हि'
मदक्किआ दाक्किआ गहीदा। मुहुत्तअं पडि-
वालेदु भट्टा। जाव जमुणाहदं गच्छिअ
चोक्खं करेमि।

हस्ते न्यासो निक्षिप्त इति' किं बहुना' गतमेव
मे शीर्षम्।
(५) किं किं प्रत्युपकार इति। यदि' कंसो वा भ-
वतु' कंसस्य पितोग्रसेनो वा भवतु। आन-
यतु भर्ता दारकम्।
(६) भर्तः' अचोक्षितो ऽस्मि' मृता दारिका गृहीता। मुहूर्तकं
प्रतिपालयतु भर्ता' यावद् यमुनाह्रदं गत्वा चोक्षं

वसुदेवः। वयस्य घोषवासात् प्रकृत्या शुचिरेव भवान्।

नन्दगोपः। (a) तेण हि अम्हाणं घोषस्स उइदं पङ्कुणा चोक्खं कळेमि।

वसुदेवः। को ऽत्र दोषः। क्रियतां शौचम्।

नन्दगोपः। (b) जं भट्टा आणवेदि। ॥तथा कुर्वन् सविस्मयम्॥ अच्छळीअं अच्छळीअं भट्टा, अच्छळीअं। पङ्कूणि मग्गमाणस्स धळणिं भिन्दिअ जुगप्पमाणा षळिळधाळा उट्ठिदा।

वसुदेवः। बालस्यैव प्रभावः। क्रियतां शौचम्।

नन्दगोपः। (c) भट्टा तह। ॥तथा कृत्वोपसृत्य॥ भट्टा अअम्हि।

करोमि।

(a) तेन ह्यस्माकं घोषस्योचितां पांसुना चुक्षां करोमि।

(b) यद् भर्ताज्ञापयति।—आश्चर्यमाश्चर्यं भर्तः आश्चर्यम्। पांसून् मार्गमाणस्य धरणीं भित्त्वा युगप्रमाणा सलिलधारोत्थिता। (c) भर्तः तथा।—भर्तः

वसुदेवः। गृह्यताम्।

नन्दगोपः। (a) भट्टा ' अदिदुब्बला मे बाहा मन्दलषदिषं बाळअं गण्हिदुं ण षमत्था।

वसुदेवः। (वयस्य।) महाबलपराक्रमः खलु भवान्

नन्दगोपः। (b) षुणादु भट्टा मम बलपक्कमं[1]। षन्दाळिअमाणे वषभे षिङ्गं गण्हिअ मोचेमि। पङ्कणिमग्गाणि भण्ड-षअडआणि आघट्टआमि। ईदिषो दाणि अहं दाळअं गण्हिदुं[2] ण षमत्थो म्हि।

अयमस्मि।

(a) भर्तः। अतिदुर्बलौ मे बाहू मन्दरसदृशं बालकं ग्रहीतुं न समर्थौ।

(b) शृणोतु भर्ता मम बलपराक्रमम्। सन्तार्यमाणे[3] वृषभे शृङ्गं गृहीत्वा मोचयामि। पङ्कनिमग्नान् भाण्डशकटकान् आघट्टयामि। ईदृश इदानीमहं दारकं ग्रहीतुं न समर्थो ऽस्मि।

॥ततः प्रविशन्ति पञ्चायुधानि गरुडश्च॥

गरुडः।

अहं सुपर्णो गरुडो महाजवः
शार्ङ्गायुधस्यास्य रथो ध्वजश्च।
पुरा हि देवासुरविग्रहेषु
वहामि भो निष्णुबलेन विष्णुम् ॥२१॥

चक्रः।

[1]चक्रो ऽस्मि कृष्णस्य कराग्रशोभी
मध्याह्नसूर्यप्रतिमोग्रतेजाः।
त्रिविक्रमे चामृतमन्थने च
मया हता दानवदैत्यसङ्घाः ॥२२॥

शार्ङ्गः।

शार्ङ्गो ऽस्मि विष्णुकरलग्नसुवृत्तमध्या
स्त्री विग्रहात् पुरुषवीर्यबलातिदर्पा।
[2]तस्यार्थमाहवमुखेषु मयारिसङ्घाः
प्रभ्रष्टनागरथवाजिनराः प्रभग्नाः[3] ॥२३॥

कौमोदकी।

कौमोदकी नाम हरेर्गदाह-
माज्ञावशात् प्राक्[4] सरयूं प्रमथ्य।
मया हतानां युधि दानवानां
[5]प्रक्रीडितं शोणितनिम्नगासु ॥२४॥

1 शङ्खः ।

शङ्खोऽहमस्मि क्षीरोदाद् विष्णुना स्वयमुद्धृतः।
मम शब्देन नश्यन्ति युद्धे ते देवशत्रवः ॥२५॥

नन्दकः।

नन्दकोऽहं न मे कश्चित् सङ्ग्रामेष्वपराङ्मुखः।
गच्छामि स्मृतमात्रेण विष्णुना प्रभविष्णुना॥ २६॥

2 चक्रः।

चक्रशार्ङ्गगदाशङ्खनन्दका दैत्यमर्दनाः।
वासुदेवस्य कार्यार्थं प्राप्ताः पारिषदा वयम्॥ २७॥

तस्मादागम्यताम्। वयमपि मनुष्यलोकमवतीर्णस्य भगवतो विष्णोर्बालचरितमनुचरितुं गोपालकवेषप्रच्छन्ना घोषमेवावतरिष्यामः।

सर्वे। तथास्तु। ॥ विष्णुमुपस्थिताः॥

वसुदेवः। वयस्य! बाल एव नश्यताम्।

नन्दगोपः। (a) भट्टा तह। छाअदाळअ। णमो दे णमो दे। ही! दीहं होदि दूळन्तरं। गेन अत्ता णं। णि-

---

a) भर्तः! तथा। राजदारक। नमस्ते नमस्ते। ही! दीर्घं भवति दूरत्वं। रैवात्मा तन्नि —

व्वाहेमि। गोवजणष्ष तुमं गण्हिदुं को बक्कमो।

चक्रः। नमो भगवते नारायणाय। भगवन् महाविष्णो!

कार्याण्यकार्याण्यखिलामराणां
त्वया भविष्यन्ति बलानि लोके।
तस्माज्जनस्यास्य लघुत्वयोगात्
कुरु प्रसादं यदुवंशकेतो ॥२८॥

वसुदेवः। गृह्यताम्।

नन्दगोपः। (a) जं भट्टा आणवेदि।

॥ गृह्णाति ॥

वसुदेवः। वयस्य प्रभाता रजनी। प्रतिनिवर्ततां भवान्।

नन्दगोपः। (b) अच्छरीअं अच्छरीअं भट्टा' अच्छरीअं। इमे बन्धणे पडिदे।

वसुदेवः। सर्वमेतत् कुमारस्य प्रभावः। प्रतिनिवर्ततां भवान्।

पोहआमि। गोपजनस्य त्वां ग्रहीतुं को बलपराक्रमः। (a) यद् भर्ताज्ञापयति।

(b) आश्चर्यमाश्चर्यं भर्तः' आश्चर्यम्। इमे बन्धने पतिते।

नन्दगोपः । (a) जं भट्टा आणवेदि ।
वसुदेवः । अथवा एहि तावत् ।
नन्दगोपः । (b) भट्टा ! अअम्हि ।
वसुदेवः ।

जाने नित्यं वत्सलं त्वां प्रकृत्या
स्नेहो ऽप्यस्मिन्नर्थ्यते रूढभावः ।
अस्मिन् काले दग्धभूयिष्ठशेषं
न्यस्तं बीजं रक्षितुं यादवानाम् ॥ २१ ॥

कुमारस्य किं करिष्यति भवान् ।

नन्दगोपः । (c) सुणाद भट्टा । एकस्सिं गेहे गच्छिअ खीरं पिबदि । अस्सिं गेहे गच्छिअ दधिं भक्खदि । अपरस्सिं गेहे गच्छिअ णवणीदं गिळदि । अस्सिं गेहे गच्छिअ पाअसं भुञ्जदि । इदस्सिं

(a) यद् भर्ताज्ञापयति । (b) भर्तः । अयमस्मि । (c) शृणोतु भर्ता । एकस्मिन् गेहे गत्वा क्षीरं पिबति । अन्यस्मिन् गेहे गत्वा दधि भक्षयति । अपरस्मिन् गेहे गत्वा नवनीतं गिलति । अन्यस्मिन् गेहे गत्वा पायसं भङ्क्ते । इतरस्मिन् गेहे

गेहे गच्छिअ तक्कघटं पक्कोअदि। किं बहुणा। अम्हाणं घोषष्य पदी होदि।

वसुदेवः। एवमस्तु। प्रतिनिवर्ततां भवान्।

नन्दगोपः। (a) जं भट्टा आणवेदि।

॥ निष्क्रान्तः ॥

वसुदेवः। ननु निर्गतो नन्दगोपः। यवदहमपि मधुरामेव यास्यामि। ॥परिक्रम्य॥ रुदितशब्द इव श्रूयते। किन्नु खलु कंसभयात् प्रतिनिवृत्तो नन्दगोपः। ॥परिक्रम्य॥ अये प्रत्यागतप्राणेयं दारिका। यावदिमां गृहीत्वा देवक्या हस्ते निक्षिप्य उत्तालानं कंसं वञ्चयामि। ॥गृहीत्वा॥ अहो गुरुत्वमस्याः। एतदपि कुमारात् किञ्चिदन्तरं महद् भूतम्। यावदपक्रामामि। अये इयं भगवती यमुना तथैव स्थिता। यावदपक्रामामि। निष्क्रान्तोऽस्मि यमुनायाः। एतन्नगरद्वारम्। तथैव प्र-

---

गत्वा तक्रघटं प्रलोकते। किं बहुना। अस्माकं घोषस्य पतिर्भवति।

(a) यद् भर्ताज्ञापयति।

सुप्तो मधुरायां सर्वो जनः। यावत् प्र-
विशामि। ॥ प्रविश्य ॥ इदं खलु दुरा-
त्मनः कंसस्य गृहं ज्येष्ठाश्रितमिव दृश्य-
ते। इदमस्मदीयं गृहं श्रियारूढमिव
दृश्यते। यावदहमभ्यन्तःपुरं प्रविश्य
देवकीं समाश्वासयामि। ईश्वराः स्व-
स्ति कुर्वन्तु।

॥ निष्क्रान्तः ॥

प्रथमोऽङ्कः।

अथ द्वितीयो ऽङ्कः ।

॥ ततः प्रविशन्ति चण्डालयुवतयः ॥

सर्वाः (a) आअच्छ भट्ट' आअच्छ ।
अम्हाणं कस्सआणं[1] तुए सह विवाहो होदु[2] ।

॥ ततः प्रविशति राजा ॥

राजा । भोः' किन्नु खल्विदम् ।
यन्मेदिनी प्रचलिता पतिताग्रहर्म्या
सन्तारनौरिव विकीर्णमहोर्मिमाला ।
दिव्यैः[3] प्रधानगुणकर्मफलैर्निमित्तैः
किं वाग्रतो व्यसनमभ्युदयो नु तन्मे ॥१॥

सर्वाः (b) आअच्छ भट्ट ' आअच्छ । अम्हा-
णं कस्सआणं तुए सह विवाहो होदु[2] ।

राजा ।
यस्मान्न रक्षिपुरुषाः प्रचरन्ति केचिद्
यस्मान्न दीपिकधराः प्रमदाश्चरन्ति ।
तस्मादिमा मम गृहं समनुप्रविष्टा
नीलोत्पलाञ्जननिभा भयदाः श्वपाकाः ॥२॥

सर्वाः । (c) आअच्छ भट्टा' आअच्छ । अम्हा-
णं कस्सआणं तुए सह विवाहो होदु ।

(a, b, c) आगच्छ भर्तः' आगच्छ । अस्माकं कन्य[4]-
कानां त्वया सह विवाहो भवतु ।

राजा । अहो. धृष्टाः[1] खल्वेताश्चण्डालयुवतयः[2] ।

क्रोधेन नश्यति सदा मम शत्रुपक्षः
सूर्यः शशी हुतवहश्च वशे स्थिता मे ।
यो ऽहं यमस्य च यमो भयदो भयस्य
तं मापवादवचनैः परिधर्षयन्ति ॥३॥

सर्वाः । [a]आअच्छ भट्टा । आअच्छ ।

राजा । आः[3] । अपध्वंसाः[4] । कथं सहसैव नष्टाः । यावदिदानीमभ्यन्तरमेव प्रविशामि ।

॥ततः प्रविशति शापः॥

शापः । हं[5] क्वेदानीं प्रविशसि । इदं खलु मम गृहं संवृत्तम् ।

राजा ।

को ऽयं विनिष्पतति गर्भगृहं विगाह्य[6]
उल्कां प्रगृह्य सहसाञ्जनराशिवर्णः ।
भीमोग्रदंष्ट्रवदनो हरिपिङ्गलाक्षः
क्रोधो महेश्वरमुखादिव गां प्रपन्नः ॥४॥

को भवान् ।

शापः । किं न जानीषे माम् । अहं खलु मधूकस्य ऋषेः शापो वज्रबाहुर्नाम ।

(a) [illegible] । आगच्छ ।

श्मशानमध्यादहमागतो ऽस्मि
चण्डालवेषेण विरूपचण्डम् ।
कपालमालातिविचित्रवेषः
कंसस्य राज्ञो हृदयं प्रवेष्टुम् ॥५॥

कंसः । असम्भाव्यमर्थं प्रार्थयसि ।

सौवर्णकान्ततरकन्दरकूटकुञ्जं
मेरुं न कम्पयति वायसपक्षवातः ।
हास्यो ऽसि भोः समकरक्षुभितोर्मिमालं
पातुं य इच्छसि कराञ्जलिना समुद्रम् ॥६॥

शापः । काले ज्ञास्यसि ।

राजा । हं कथं सहसैव नष्टः । यावदहमपि शयनमुपगम्य नयनव्याक्षेपं करोमि । ॥ स्वपिति ॥

शापः । अये प्रसुप्तः । अनच्छिन्न खलति कालरात्रि महानिद्रे पिङ्गलाक्षि । तदागम्यतामभ्यन्तरं प्रविशामः ।

सर्वाः । (a) एवं होदु ।

॥ प्रविश्य ॥

राजश्रीः । न खलु प्रवेष्टव्यम् ।

शापः । का भवती ।

श्रीः । किं मां न जानीषे । अहं खल्वस्य लक्ष्मीः ।

(a) एवं भवतु ।

शाप: । एवम् । राजश्री: । अपक्राम-
तु भवती । इदं खलु[1] मम गृह सवृत्तम् ।

श्री: । हम् ।

लङ्कोपम मम गृहं नविचिन्त्य[2] मूढ
कस्याश्रयाद् विशसि मामवधूय रात्रौ ।
किं भाषितेन बहुना न च शक्यमेतद्
द्रष्टुं प्रवेष्टुमिह[3] ते ऽद्य मयाभिजुष्टम् ॥७॥

शाप: । भगवति पद्मालये । अप-
क्रामतु[4] किल कसशरीरात् । विष्णुराज्ञापयति।

श्री: । कथं विष्णुराज्ञापयतीति भो:
कष्टम् ।

न चाहं चिरसंवासात् त्यक्तुं शक्नोमि पार्थिवम्।
बलवान् गुणसङ्गो[5] हि दृढं तपति मामयम् ॥८॥

भवतु । अनतिक्रमणीया विष्णोराज्ञा । त-
स्मादहमपि विष्णुसकाशमेव यास्यामि ।

॥ निष्क्रान्ता ॥

शाप: । अपक्रान्ता राजश्री: । हन्ते-
दानीमिदमस्माकमावास: संवृत्त: । अल-
क्ष्मि खलति कालरात्रि महानिद्रे पिङ्गला-
क्षि । अभ्यन्तरं प्रविश्य स्वजातिसदृशी क्री-
डा क्रियताम् ।

सर्वा: । अज्जप्पहादि अवणीद-

धम्मचारित्तो होहि। (a)

शापः।

परिष्वजामि गाढं त्वां नित्याधर्मपरायणम्।
प्राप्नोमि मुनिशापस्त्वामचिरान्नाशमेष्यसि ॥९॥

॥ अन्तर्हितः ॥

॥ प्रविश्य ॥

प्रतिहारी। (b) जेदु भट्टा।

राजा। हं।

प्रतिहारी। (c) भट्टा। जसोधरा खु अहं।

राजा। यशोधरे। किं त्वया मातङ्गीजनप्रवेशो न दृष्टः।

प्रतिहारी। (d) हं मादङ्गिजणो[1] त्ति। णिच्चं भट्टिपादमूले वत्तमाणस्स एव[2] जणस्स इह[3]प्पवेसो दुल्लहो। किं पुण[4] मादङ्गिजणस्स।

(a) अद्यप्रभृत्यपनीतधर्मचारित्रो भव।

(b) जयतु भर्ता।

(c) भर्तः। यशोधरा खल्वहम्।

(d) हं मातङ्गीजन इति। नित्यं भर्तृपादमूले वर्तमानस्यैव जनस्येह[5]प्रवेशो दुर्लभः। किं पुनर्मातङ्गीजनस्य।

राजा । किं स्वप्नो नु मयानुभूतः । यशोधरे गच्छ । बालाकिः काञ्चुकीयः प्रवेश्यताम् ।

प्रतिहारी । (a) जं भट्टा आणवेदि ।

॥ निष्क्रान्ता । ततः प्रविशति काञ्चुकीयः ॥

काञ्चुकीयः । जयतु महाराजः ।

राजा । आर्य बालाके । प्रष्टव्यौ[1] सांवत्सरिकपुरोहितौ [2] अद्य रात्रौ वातोद्भ्रामभूमिकम्पोल्कापाता दैवतप्रमर्दाश्च[3] प्रतिभासिताः किमर्थमिति ।

काञ्चुकीयः । [यदाज्ञापयति[4] महाराजः । ॥ निष्क्रम्य प्रविश्य ॥ जयतु] महाराजः[5] । सांवत्सरिकपुरोहितौ विज्ञापयतः ।

राजा । किमिति ।

काञ्चुकीयः । श्रूयताम् ।

भूतं नभस्तलनिवासि नरेन्द्र नित्यं
कार्यान्तरेण नरलोकमिह प्रपन्नम् ।
आकाशदुन्दुभिरवैः समहीप्रकम्पै-
स्तस्यैव जन्मनि विशेषकरो विकारः ॥१०॥

(a) यद् भर्ताज्ञापयति ।

राजा।

कस्मिञ्जाते सशैलेन्द्रा कम्पितेयं वसुन्धरा।
ज्ञायतां कस्य पुत्रेति किं वा जन्मप्रयोजनम्॥ ११॥

इति।

काञ्चुकीयः। यदाज्ञापयति महाराजः। ॥ निष्क्रम्य प्रविश्य॥ जयतु महाराजः। [भट्टिन्या देवक्या दारिका प्रसूता।

राजा। अपि सत्यम्।

काञ्चुकीयः। महाराज।] अनृतं नाभिहितपूर्वं मया। भवतो भृत्यवर्गपरिवृताया धात्र्या हस्ते दृष्टा सा।

राजा। अथवा ब्राह्मणवचनमनृतमपि सत्यं पश्यामि। गच्छ। वसुदेवस्तावदाहूयताम्।

काञ्चुकीयः। यदाज्ञापयति महाराजः। ॥ निष्क्रान्तः॥

राजा। धर्मशीलः सत्यवादी वसुदेवः। अथ तु मम समीपे ऽनृतं न ब्रवीति। भवतु। श्रोष्यामस्तावत्।

॥ ततः प्रविशति वसुदेवः॥

वसुदेवः ।

षण्णां सुतानां समुपेत्य नाशं
वहन्निदं शोककृशं शरीरम् ।
आहूयमानो ऽक्रूरेण राज्ञा
गच्छाम्यहं भृत्य इवास्वतन्त्रः ॥१२॥

भोः । एवंविधा लोकवृत्तिः ।

स्मरतापि भयं राजा भयं नस्मरतापि वा।
उभाभ्यामपि गन्तव्यो भयादप्यभयादपि ॥१३॥

॥उपसृत्य॥ शौरसेनीमातः । आस्यते ।

राजा । यादवीमातः । आस्यताम् ।

वसुदेवः । बाढम् । ॥उपविश्य॥

शौरसेनीमातः । किमर्थं वयमाहूताः ।

राजा । यादवीमातः । प्रसूतवती किल देवकी ।

वसुदेवः । अथकिम् । प्रसूतवती ।

राजा । किं प्रसूतम् ।

वसुदेवः । ॥ आत्मगतम् ॥ मयापि नामानृतं वक्तव्यं भविष्यति । अथवा कुमाररक्षणार्थमनृतमपि सत्यं पश्यामि । किमिदानीं करिष्ये । भवतु । दृष्टम् । ॥ प्रकाशम् ॥ दारिका प्रसूता तया ।

राजा।

दारिका वा कुमारो वा हन्तव्यः सर्वथा मया।
दैवं पुरुषकारेण वञ्चयिष्याम्यहं ध्रुवम् ॥१४॥

॥ प्रविश्य ॥

प्रतिहारी। (a) जेदु भट्टा। अम्हाअं भट्टिणी विण्णवेदि[1] दारिअ[2] त्ति बाल त्ति अ कीरअदु किल महाराएण अणुक्कोसो।

वसुदेवः। शौरसेनीमातः। क्रियतां तपस्विन्या देवक्या वाक्यम्। दारिकासु स्त्रीणामधिकतरः स्नेहो भवति।

राजा। किं भवान् स्मरति समयम्।
मधूकस्य ऋषेः शापं श्रुत्वा मे समयस्तदा।
देवक्या धारितान् गर्भान् दास्यामीति त्वया[3] कृतः॥
१५॥

वसुदेवः।

समय इति। एष न व्याहरामि।

प्रतिहारी। (b) भट्टा। किं त्ति अम्हाअं भट्टिणीए णिवेदिदव्वं।

राजा। यशोधरे। उच्यतां देवक्याः[4]

(a) जयतु भर्ता। अस्माकं भट्टिनी विज्ञापयति[1] दारिकेति बालेति च क्रियतां किल महाराजेनानुक्रोशः। (b) भर्तः। किमित्यस्माकं भट्टिन्यै

न युक्तमिदानीं निर्बन्धमभिधातुम्। अन्यत् प्रियतरं करिष्यामीति।

प्रतिहारी। (a) जं भट्टा आणवेदि।

राजा। यशोधरे। एवं क्रियताम्।

प्रतिहारी। (b) सुहं पविसदु किल भट्टा।

वसुदेवः। विविक्तमिच्छता मयापि नाम परापत्यं निधनमुपनेतव्यं भवति। किन्तु खलु कुमारमेवानीय प्रयच्छामि। अथवा।

दारिकेयं मृता पूर्वं पुनरेव समुत्थिता।
अस्य बालस्य महात्म्यान्नैषा वधमवाप्स्यति॥१६॥

यावदहमपि देवकीं समाश्वासयामि। ॥ निष्क्रान्तः॥

राजा। यशोधरे। प्रवेश्यतां सा दारिका।

प्रतिहारी। (c) जं भट्टा आणवेदि।

॥ निष्क्रान्ता। ततः प्रविशति दारिकां गृहीत्वा धात्री रक्षिपुरुषाश्च॥

सर्वे। (d) सणिअं सणिअं अय्या।

निवेदयितव्यम्।

(a) (c) यद् भर्ताज्ञापयति (b) सुखं प्रविशतु किल भर्ता।

(d) शनैः शनैरार्या। इदं मध्यमद्वारम्।

इदं मज्झमदुवाळं। पविसदु अय्या।

धात्री। ॥ प्रविश्य ॥ (a) जेदु भट्टा। इअं दारिआ अम्हेहि चिरप्पहुदि रक्खिदा।

राजा। अहो रात्रदर्शनीयेयं दारिका। मयापि नाम स्त्रीवधः कर्तव्यो भवति।

धात्री। (b) सणिअं सणिअं भट्टा।

राजा। इयं कंसशिला। यावत् साहसमनुष्ठास्यामि।

अयं हि सप्तमो गर्भ ऋषिशापबलोत्थितः।
अस्मिन् नाशं गते गर्भे मम शान्तिर्भविष्यति ॥१७॥

॥ गृहीत्वा प्रहृत्य ॥ अये।

एकांशपतितो भूमावेकांशाद् दिवमुन्नतः।
मां निहन्तुमिहोद्भूतः करैः शस्त्रसमुज्ज्वलैः ॥१८॥

अये। इयमिदानीं

तीक्ष्णाग्रं शूलमालम्ब्य रौद्रवेषेण जृम्भते।
विनाशकाले सम्प्राप्ते कालरात्रिरिवोत्थिता ॥१९॥

॥ ततः प्रविशति कात्यायनी सपरिवारा ॥

प्रविशत्वार्या।

(a) जयतु भर्ता। इयं दारिकास्माभिश्चिरात्प्रभृ- रक्षिता। (b) शनैः शनैर्भर्तः।

कात्यायनी ।

शुम्भं निशुम्भं महिषं च हत्वा
कृत्वा सुरानाहतशत्रुपक्षान् ।
अहं प्रसूता वसुदेववंशे
कात्यायनी कंसकुलक्षयाय ॥२०॥

कुण्डोदरः ।

कुण्डोदरोऽहमजितो रणचण्डकर्मा
देव्याः प्रसूतिजनितोऽग्रमहानिनादः ।
शीघ्रं प्रयामि गगनादवनीं विशालां
दृप्तान् जिघांसुरसुरानतिवीर्यदर्पान् ॥२१॥

शूलः ।

शूलोऽस्मि भूतमिह भूमितले प्रपन्नो
देव्याः प्रसादजनितोज्ज्वलचारुवेषः ।
कंसं निहत्य समरे परिकर्षयामि
तं पादपं जलनिधेरिव कार्त्तिकेयः ॥२२॥

नीलः ।

अहं हि नीलः कलहस्य कर्ता
सङ्ग्रामशूरो नपराङ्मुखश्च
निहन्मि कंसं युधि दुर्विनीतं
क्रौञ्चं यथा शक्तिधरः प्रकृष्टः ॥२३॥

मनोजवः ।

मनोजवो मारुततुल्यवेगो

देव्यास्तु कार्यार्थमिहोपयातः।
करोमि सङ्ग्रामशिरःसु दैत्यान्
वह्निर्नलानां निलयं यथैव ॥२४॥

कात्यायनी। कुण्डोदर शङ्कुकर्ण महानील मनोजव तदागम्यताम्। भगवतो विष्णोर्बालचरितमनुभवितुं गोपालकवेषप्रच्छन्ना घोषमेवावतरिष्यामः।

सर्वे। यदाज्ञापयति भगवती।

॥ निष्क्रान्ता सपरिवारा कात्यायनी ॥

राजा। अये प्रभाता रजनी।

अतः प्रविश्य शान्त्यर्थं शान्तिकर्मोचितं गृहम्।
करोमि विपुलां शान्तिं मम शान्तिर्भविष्यति॥ २५॥

निष्क्रान्ताः सर्वे ॥

द्वितीयोऽङ्कः।

अथ तृतीयो ऽङ्कः ।

॥ततः प्रविशति वृद्धगोपालकः॥

वृद्धगोपालकः। (a) भो मेघदिस्स खु[1] वषभदिस्स[2] खु[1] कुम्भदिस्स[3] खु[1] घोषदिस्स खु[1] पकालेह[4] पकालेह[4] गोधणं। एदे[5] अष्षिं वुंन्दावणे[6] पकामं पाणीअ पादूण[7] डुम्भाळवं[17] कळन्ता[8] आअन्ति[9]। एषो गोवषभजूहादो[10] णिक्कमिअ पळिघट्टिद[11]वम्मीअमूळो भुजङ्गेहि कुवलेहि[12] णीळुप्पळदामेहि[13] षिङ्गळगेहि विअ

(a) भो मेघदत्त खलु[1] वृषभदत्त खलु[1] कुम्भदत्त खलु[1] घोषदत्त खलु[1] प्रकालयत प्रकालयत गोधनम्। एते[14]ऽस्मिन् वृन्दावने प्रकामं पानीयं पीत्वा डुम्भारवं कुर्वन्त[15] आयान्ति[16]। एष गोवृषभयूथान्निष्क्रम्य परिघट्टितवल्मीकमूलो भुजङ्गैः कुवलै[17]र्नीलोत्पलदामभिः शृङ्गलग्नैरिव वृषभः शोभते। अन्यो ऽप्येष वृषभ उत्कृत-

वषभो षोभदि । अस्मो वि एषो वषभो उ-
ष्पिद[1]प्पषा[2]लिदपुच्छो णिकुञ्चिद[3]जाणू
षषी[4] व धवलङ्गो अग्गविषाणेहिं[5] महिं
[6]उक्खिवन्तो विअ षोभदि । जाव दाणिं
दामअं षद्दावेमि[7] । अले दामअ ! भअ-
वदीओ[8] षुट्ठु[9]ले ओदालिअ षहवच्छाओ[10]
तुवं पि आअच्छ ।

॥ ततः प्रविशति दामकः ॥

दामकः । (a) अहो महन्तं तिण-
जालं षामिणो णन्दगोवप्प । पुदजणण-
दिणादो आलहिअ अहिअदलं आण-
न्दब्भुदं वड्ढदि[11] । भोदु । इह चिट्ठदु

- प्रसारितपुच्छो निकुञ्चितजानुः शशीव
धवलाङ्गो ऽग्रविषाणाभ्यां महीमुत्क्षिपन्नि-
व शोभते । यावदिदानीं दामकं शब्दा-
[12]पयामि । अरे दामक ! भगवतीः सुष्ठु[13] ले
ऽवतार्य सहवत्सास्त्वमप्यागच्छ ।

(a) अहो महत् तृणजालं स्वनि-
नो नन्दगोपस्य । सुतजननदिनादारभ्य-
धिकतरमानन्दाद्भुतं वर्धते । भवतु इह
तिष्ठतु गोधनं[14] यावन्मातुलस्य

गोधणं जाव माडुळं उवषप्पिष्यं ।
॥ उपसृत्य ॥ माडुळ वन्दामि ।

वृद्धगोपालकः । (a) षन्ती होदु ष-
न्ती होदु अम्हाणं गोधणष्ष अ ।

दामकः । (b) माडुळ । जदप्पहुदि गन्दगोवपुत्तो[3] पषूदो तदप्पहुदि अम्हाणं गोधणं वज्जिदरोअं[4] षंवुत्तं ।[5] तं षव्वाणं गोवजणाणं पीदी वड्ढदि[6] । अरुं च । खादे खादे मूळाणि । षुफ-[7]
काणि गुम्मे[8] गुम्मे । [9]मइ जत्तअं एव दुह्यदि । खीरं तत्तअं गेह्नदि ।

मि । मातुल वन्दे ।

(a) शान्तिर्भवतु शान्तिर्भवत्वस्माकं गोधनस्य च ।

(b) मातुल । यदाप्रभृति नन्दगोपपुत्रः प्रसूतः । तदाप्रभृत्यस्माकं गोधनं वर्जितरोगं संवृत्तम् । [10]तत्सर्वेषां गोपजनानां प्रीतिर्वर्धते । अन्यच्च । खाते खाते मूलानि । सुफलानि गुल्मे गुल्मे । [11]मयि (मया ?) यावदेव दुह्यते । क्षीरं तावद् गृह्यते ।

वृद्धगोपालकः।, (a) अस्सं, च इदं अच्छरिअं। दष[1]रत्तपषूदे णन्दगोववुत्ते पूदणा[2] णाम दाणवी विषषम्पूरि[3]दत्थणा णन्दगोवीए रूवं[4] गण्हिअ आअदा। तदो ताए दारअं गण्हिअ तष्ष मुहे थणं[5] पक्खित्तं। तदो तं विजाणिअ दुवी[6] ,पाडिदाणि थणाणि[6]। षा वि दाणवी भविअ तत्तो एव्व मुदा। तदो माषमत्ते णन्दगोववुत्ते षअडो णाम दाणवो षअडवेषं गण्हिअ आअदो। त पि जाणिअ एकपादप्पहारे[7]ण चुण्णीकिदो षो वि दाणवो

(a) अन्यच्चेदमाश्चर्यम्। दशरात्रप्रसूते नन्दगोपपुत्रे पूतना नाम दानवी विषसम्पूरितस्तना नन्दगोप्या रूपं गृहीत्वागता। ततस्तया दारक गृहीत्वा तस्य मुखे स्तनः प्रक्षिप्तः। ततस्तां विज्ञाय [8]द्विधा पाटितौ स्तनौ। सापि दानवी भूत्वा तत एव मृता। ततो मासमात्रे नन्दगोपपुत्रे शकटो नाम दानवः शकटवेष गृहीत्वागत। तमपि ज्ञात्वैकपादप्रहारेण चूर्णीकृतः सोऽपि दानवो भूत्वा तत एव मृतः। ततो

भविअ तत्तो एव्व मुदो। तदो मासपळिवु[1]त्ते णन्दगोवपुत्ते एकस्सिं गेहे गच्छिअ खीरं पिबदि[2]। अस्सस्सिं गेहे गच्छिअ दधिं भक्खदि[3]। एकस्सिं गेहे गच्छिअ णवणीदं गिळदि। अस्सस्सिं गेहे गच्छिअ पाअसं[4] भुञ्जदि[5]। अपरस्सिं[6] गेहे गच्छिअ तक्कघटं पळोअदि। तदो कुट्ठाहिं गोवजुवदीहिं णन्दगोवीए उत्तं। तदो कुट्ठाए णन्दगोवीए दामं गण्हिअ तस्स मज्झे बन्धिअ सेसं उक्खले बद्धं[7]। तदो तं पि उक्खलं आघट्टअन्तं पेक्खिअ जमकज्जुणे[8] णाम दाणवे णिक्खित्तं[9]। तदो दुवे एक्कीभूदे[10]।

मासपरिवृत्ते[11] नन्दगोपपुत्रे। एकस्मिन् गेहे गत्वा क्षीरं पिबति। अन्यस्मिन् गेहे गत्वा दधि भक्षयति। एकस्मिन् गेहे गत्वा नवनीतं गिलति[12]। अन्यस्मिन् गेहे गत्वा पायसं भुङ्क्ते। अपरस्मिन् गेहे गत्वा तक्रघटं प्रलोकते। ततो रुष्टाभिर्गोपयुवतिभिर्नन्दगोप्यै उक्तम्। ततो रुष्टया नन्दगोप्या दाम गृहीत्वा तस्य मध्ये बद्ध्वा शेषमुलूखले बद्धम्। ततस्तदप्युलूखलमाघट्टयत् प्रेक्ष्य यमलार्जुनयोर्नाम दानवयोर्निचि-

तेषं अन्तकेण गच्छन्तेण णन्दगोवपुत्तेण
आघट्टअन्तेण पमूळविडवं चुस्सीकिदे ते वि
दाणवे भविअ तत्तो एव्व मुदे[2]। तदो गो-
वजणेहि उत्तं[3] महाबळपळक्कमो अज्जप्पहुदि
भट्टिदामोदको णाम होदु त्ति। तदो आहाव-
णप्पहावणमत्तें णन्दगोववुत्ते पळम्बो[4] णाम
दाणवो णन्दगोववेषं[5] गण्हिअ आअदो। तदो
षङ्कळिषणं कण्ठे णिक्खिविअ गच्छन्तं तं
विजाणिअ भट्टिणा षङ्कळिषणेण तष्ष दाण-
वष्ष पीषे मुट्ठिप्पहाळो[6] किदो। तेण पहा-[7]
ळेण उक्खित्तचक्खू षो वि दाणवो भविअ

मृतम्। ततो द्वावेकीभूतौ। तयोरन्तरेण गच्छता न-
न्दगोपपुत्रेणाघट्टयता समूलविटपं चूर्णीकृतौ ता-
वपि दानवौ भूत्वा तत एव मृतौ। ततो गोपज-
नैरुक्तं[3] महाबलपराक्रमोऽद्यप्रभृति भर्तृदामोदरो
नाम भवत्विति[8]। तत आधावनप्रधावनमात्रे
नन्दगोपपुत्रे' प्रलम्बो नाम दानवो नन्दगोपवेषं
गृहीत्वागतः। ततः सङ्कर्षणं कण्ठे निक्षिप्य ग-
च्छन्तं तं विज्ञाय भर्त्रा सङ्कर्षणेन तस्य दा-
नवस्य शीर्षे मुष्टिप्रहारः कृतः। तेन प्रहारे-
णोत्क्षिप्तचक्षुः सोऽपि दानवो भूत्वा तत

तत्तो एव्व मुदो। गोवजणेहिं पलिवुदो[1] ता-
लहलाणि गण्हिदु तालवणं गदो। तहिं ता-
लवणे धेणुओ णाम दाणवो गद्दभवेसं[2] गण्हिअ
आअदो। तदो तं पि जाणिअ भट्टिदामोद-
लेण तष्य वामपादं गण्हिअ उक्खिविअ
पादिदाणि तालफलाणि। सो वि दाणवो
भविअ तत्तो एव्व मुदो। तदो केषी[3] णाम
दाणवो तुलङ्गवेषं[4] गण्हिअ आअदो। तदो
तं पि जाणिअ भट्टिदामोदलेण तष्य मुहे
कोप्परो[5] दिण्णो। तदो तेण दुवी[6] पाडि-
दो तुलङ्गो। षो वि दाणवो भविअ तत्तो

एव मृतः। गोपजनैः परिवृतस्तालफलानि ग्र-
हीतुं तालवनं गतः। तत्र तालवने धेनुको
नाम दानवो गर्दभवेषं गृहीत्वागतः। तत-
स्तमपि ज्ञात्वा भर्तृदामोदरेण तस्य वामपा-
दं गृहीत्वोत्क्षिप्य पातितानि तालफलानि।
सो ऽपि दानवो भूत्वा तत एव मृतः। ततः
केशी नाम दानवस्तुरङ्गवेषं गृहीत्वागतः।
ततस्तमपि ज्ञात्वा भर्तृदामोदरेण तस्य मुखे
कूर्परो दत्तः। ततस्तेन द्विधा पाटितस्तु-
रङ्गः। सो ऽपि दानवो भूत्वा तत ए

एव्व मुदा । एदाणि अण्णाणि अ[2] कम्माणि किदाणि भट्टिदामोदकेण ।

दामकः । (a) मादुक ! पव्वं दाव चिट्ठदु । अज्ज भट्टिदामोदको इमस्सिं वुन्दावणे गोवकण्णआहिं सह हल्लीसअं णाम[4] पकीळिदुं आअच्छदि ।

•वृद्धगोपालकः । (b) तेण हि पव्वेहिं गोवजणेहिं सह भट्टिदामोदकस्स हल्लीसअं पेक्खम्ह ।

दामकः । (c) जं मादुलो आणवेदि ।

॥ निष्क्रान्तौ ॥

प्रवेशकः ।

मृतः । एतान्यन्यानि च[2] कर्माणि कृतानि भर्तृदामोदरेण ।

(a) मातुल ! सर्वं तावत् तिष्ठतु । अद्य भर्तृदामोदरो ऽस्मिन् वृन्दावने गोपकन्यकाभिः सह हल्लीशकं[5] नाम प्रक्रीडितुमागच्छति ।

(b) तेन हि सर्वैर्गोपजनैः सह भर्तृदामोदरस्य •हल्लीशकं प्रेक्षामहे[6] ।

•(c) यद् मातुल आज्ञापयति ।

॥ प्रविश्य ॥

वृद्धगोपालकः ।

(a) अणुदिअमत्ते पुय्ये पणमह पव्वादलेण षीषेण।
णिच्चं जगमांदूणं गोणाणं अमिदपुसाणं[2] ॥१॥
अहो अम्हाणं पक्कणाणं षमिद्धी । आडोव-
षज्जाओ पडहरूव[3] वेषाओ वाहलिदुं ग-
च्छामो[4] अम्हाअं गोवकण्णआओ । घोषषुन्द-
लि वणमाले चन्दलेहे मिअक्खि । आअच्छ-
ह आअच्छह षिग्घं ।

॥ ततः प्रविशन्ति सर्वाः ॥

सर्वाः । (b) मादुल वन्दामो ।

वृद्धगोपालकः । (c) दालिआ । एषो
भट्टा दामोदलो गोक्खील[5] पण्डलेण[5] भट्टिणा

(a) अनुदितमात्रे सूर्ये प्रणमत सर्वादरेण शीर्षेण ।
नित्यं जगन्मातृणां गवाममृतपूर्णानाम् ॥१॥
अहो अस्माकं पक्कणानां समृद्धिः । आटोपस-
ज्जाः पटहरूपवेषा व्याहर्तुं गच्छामो[4]ऽस्मा-
कं गोपकन्यकाः । घोषसुन्दरि वनमाले च-
न्द्ररेखे मृगाक्षि । आगच्छतागच्छत शीघ्रम् ।
(b) मातुल वन्दामहे ।
(c) दारिकाः । एष भर्ता दामोदरो[6] गोक्षीर—

षङ्कसिणेण सह गोवालएहिं *अ पलि-वुदो गुहाणिक्खित्तो सिंहो विअ इदो एव्व आअच्छदि ।

॥ ततः प्रविशति गोपजनपरिवृतो दामोदरः सङ्कर्षणश्च ॥

दामोदरः । ॥ सविस्मयम् ॥ अहो प्रकृत्या रमणीयानां गोपकन्यकानां वेषग्रहणविशेषः ।

एताः प्रफुल्लकमलोत्पलवक्त्रनेत्रा
गोपाङ्गनाः कनकचम्पकपुष्पगौराः ।
नानाविरागवसना मधुरप्रलापाः
क्रीडन्ति वन्यकुसुमाकुलकेशहस्ताः ॥ २ ॥

सङ्कर्षणः । एते गोपदारकाः समागताः ।

रक्तैर्वैसुकडिण्डिमैः प्रमुदिताः केचिन्नदन्तः स्थिताः
केचित् पङ्कजपत्रनेत्रवदनाः क्रीडन्ति नानाविधम् ।

पाण्डरेण भर्त्रा सङ्कर्षणेन सह गोपालकैश्च परिवृतो गुहानिक्षिप्तः सिंह इवेत एवागच्छति ।

घोषे जागरिता[1] कुरुप्रमुदिता दुन्दुभारँ-
शब्दाकुले
वृन्दारण्यगते समप्रमुदिता गायन्ति
केचित् स्थिताः[3] ॥३॥

वृद्धगोपालकः। (a) आम भट्टा' पव्वा षसद्धा" आअदा ।

दामकः। (b) जेदु भट्टा ।

सङ्कर्षणः। दामक ' सर्वे गोपदारकाः समागताः ।

दामकः। (c) आम भट्टा ' षव्वे पसद्धा आअदा ।

दामोदरः। घोषसुन्दरि वनमाले चन्द्ररेखे मृगाचि ' घोषवासस्यानुरूपोऽयं हल्लीशकनृत्तबन्ध उपयुज्यताम् ।

सर्वाः। (d) जं भट्टा आणवेदि।

सङ्कर्षणः। दामक मेघनाद ' वाद्यन्तामातोद्यानि ।

उभौ। (e) भट्टा' तह ।

(a) आम भर्तः। सर्वे सन्नद्धा आगताः।
(b) जयतु भर्ता। (c) = (a)
(d) यद् भर्ताज्ञापयति । (e) र्तः' तथा ।

वृद्धगोपालकः। (a) भट्टा ! तुम्हे हल्ली-
सअं[1] पकीळह[2]। अहं एत्थ किं करेमि[3]।

दामोदरः। पेक्खको भवान् ननु।

वृद्धगोपालकः। (b) भट्टा ! तह।

॥ सर्वे नृत्यन्ति ॥

वृद्धगोपालकः। (c) ही ही सुट्ठु
गाइदं[4]। सुट्ठु वाइदं। सुट्ठु णच्चिदं। जाव
अहं वि णच्चेमि। परिस्सन्तो[5] खु अहं।

॥ प्रविश्य ॥

गोपालकः। (d) हा हा भट्टा अव-
क्कमदु इमादो देसादो[6]।

दामोदरः। दामक ! किमसि सम्भ्रा-
न्तः।

गोपालकः। (e) एसो अरिट्ठवसभो

